# लघुमञ्जूषादिशा आख्यातार्थविचारसन्दर्भे शानजर्थविमर्शः

**प्रलय-नन्दी***

## Abstract

[संख्याकालयोः आख्यातसामान्यार्थत्वमिति सर्वसम्मतम् । परन्तु आख्यातविशेषार्थविषये शाब्दिकमीमांसकयोः स्पष्टो विरोधो दृश्यते । शाब्दिकमते कर्तृकर्मभावानाम् आख्यातविशेषार्थत्वं, मीमांसकमते भावनाया आख्यातविशेषार्थत्वमिति विशेषः । एवं मतभेदाद् अनयोः प्रतिपादनशैल्यामपि विशेषः अवलोक्यते । शाब्दिकैः लकाराणां कर्त्राद्यर्थकत्वम् आदाय तदादेशभूतानां तिबादीनामपि समानार्थकत्वं प्रतिपाद्यते । परन्तु मीमांसकैः भावनाया एव तिबाद्यर्थत्वं व्याख्यातम् । तत्र भावनया कर्तृकर्मणोः आक्षेपो भवतीति विशेषः । एवं तिबादीनां विषये निर्वाहे सति शानजाद्यर्थविषये जिज्ञासा उदेति । मीमांसकैः शानजादीनां कृत्-प्रत्ययानां कर्त्राद्यर्थकत्वमेव स्वीकृतम् । इत्थम् आख्यातानां कृतां च प्रसङ्गे तेषां पृथक् पृथग् मतं विद्यते । शाब्दिकैस्तु उभयेषामपि लस्थानिकत्वात् कर्त्राद्यर्थकत्वमेव अस्त्विति सिद्धान्तितम् । एवं मीमांसकानां मते कार्यकारणभावगतं गौरवं दृश्यते तन्निरासाय च तैः प्रयासो विधीयते । प्रकृते प्रबन्धे अयमेव प्रसङ्गः विस्तरशः निरूप्यते ।]

**कुञ्चिकाशब्दाः—** आख्यातम्, शानच्, कर्ता, कर्म, सङ्ख्या, विशेष्यम् ।

## भूमिका

मीमांसकैः भावनामुख्यविशेष्यकः शाब्दबोधः स्वीक्रियते । तेषां मते व्यापारातिरिक्ताया भावनाया आख्यातार्थत्वेन प्रतीतिर्भवतीति सिद्धान्तः । प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यं मत्वा तैः शाब्दबोधे आख्यातार्थभूताया भावनायाः प्राधान्यं निरूपितम् । इत्थम् तिबादीनां प्रत्ययानां भावनार्थकत्वे स्वीकृतेऽपि मीमांसकैः कृत्-प्रत्ययानां कर्त्राद्यर्थकत्वमेव सिद्धान्तितम् । "कर्तरि कृदि"ति [अष्टाध्यायी ०३.०४.६७] सूत्रस्य प्रामाण्यात् कृतां कर्त्राद्यर्थकत्वं सम्भवतीति तेषामाशयः । परन्तु तद्रीत्या "लः कर्मणि च भावे चाकर्मकेभ्यः" [अष्टाध्यायी ०३.०४.६९] इति सूत्रस्य प्रामाण्यात्

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु ; Email : prolay.nandi.vedvid@gmail.com

तिङामपि कर्त्राद्यर्थकत्वं स्वीकर्तव्यमिति शाब्दिकैः स्वीक्रियते । परन्तु लक्ष्यसंस्कारकस्य महावाक्यार्थस्य बोधोपपत्तये लः कर्मणीत्यादिसूत्रस्य तिप्तस्झीत्यादिना द्व्येकयोरित्यादिना च सूत्रेण एकवाक्यत्वं स्वीक्रियते । तदा लकारविधेः तिबादिविधेश्च एकवाक्यत्वमादाय लकाराणां कर्त्रादिगत-सङ्ख्यावाचकत्वमेव लभ्यते । अनेन तिङां कर्त्राद्यर्थकत्वे लः कर्मणीत्यादिसूत्रस्य न किञ्चित् प्रामाण्यमिति मीमांसकानाम् आशयः ।

**शोधसमस्या**

पूर्वोक्तरीत्या सङ्ख्याया विशेष्यत्वात् तस्या एव वाच्यत्वम् आपद्येत । तथाहि, मीमांसकैः प्राधान्यस्य शक्तिनियामकत्वं स्वीकृतम् । तद्रीत्या सङ्ख्यारूपार्थस्य प्राधान्यात् तस्यैव वाच्यत्वं प्रतिपादनीयं भवेदिति आशयः । न चेष्टापत्तिः, तथा स्वीकारे नैयायिकानां मते लकाराणां निरर्थकत्वापत्तेः । नैयायिकानां मते प्रथमान्तपदेनैव सङ्ख्यारूपार्थस्य लाभो भवति । तथा च शब्दार्थस्य अनन्यलभ्यत्वात् सङ्ख्यारूपार्थे पुनः लकाराणां शक्तिकल्पनं न सम्भवेत् । इत्थं लकाराणां निरर्थकत्वम् आपद्येत इत्याशयः ।

किञ्च, मीमांसकरीत्या शानच्-प्रत्ययस्य अपि कर्तृगतसङ्ख्यार्थकत्वम् आपद्यते । मीमांसकैः लविधि-तिबादिविध्योः एकवाक्यत्वात् लस्थानिकस्य तिङ्-प्रत्ययस्य कर्तृगतसङ्ख्यार्थकत्वं प्रतिपादितम् । लस्थानिकत्वं शानच्-प्रत्ययेऽपि विद्यते । एवञ्च लस्थानिकत्वाविशेषात् शानच्-प्रत्ययस्यापि कर्तृगतसङ्ख्यार्थकत्वम् आपद्येत इति मीमांसकमते दोषो बोध्यः । इत्थं मीमांसकमते शानचः कर्तृवाचकत्वासिद्धिरूप-दोषान्तरापत्तेः लकाराणां कर्त्राद्यर्थकत्वमेव स्वीकरणीयम् । स्वीकृते च तस्मिन्नर्थे तिङामपि कर्त्रर्थकत्वं लभ्यत इति शाब्दिकानाम् आशयः । प्रकृते प्रबन्धे अस्मिन् विषय एव संक्षिप्तो विमर्शः प्रस्तूयते ।

**मीमांसकमते शानजर्थः**

"लटः शतृशानचावप्रथमासमानाधिकरणे" [अष्टाध्यायी ०३.०२.१२४] इति सूत्रेण विधीयमानस्य शानचः लस्थानिकत्वाविशेषात् तिङ्-प्रत्ययवत् शानचोऽपि कर्तृगतसङ्ख्यार्थकत्वम् आपद्यत इति मीमांसामते दोषः शङ्कितः । ततश्च कृदन्तेषु "कर्तरि कृदि"ति [अष्टाध्यायी ०३.०४.६७] सूत्रप्रामाण्येन कृतां कर्त्रर्थकत्वं लभ्यते, तेन शानचः कर्तृवाचकत्वं सिध्यतीति व्याख्यानेन

मीमांसकैः दोषो निवारितः । अतो मीमांसकमते शानचः कर्त्रर्थकत्वं सिद्धम् । परन्तु शानजादीनां विषयेऽस्य सूत्रस्य अप्रवृत्तिरेव स्वीक्रियते ।

तथाहि, "कर्तरि कृदि"ति [अष्टाध्यायी ०३.०४.६७] सूत्रं यत्रार्थाकाङ्क्षा भवति तत्रैव प्रवर्तते । अतोऽनिर्दिष्टार्थेषु ण्वुलादिष्वस्य सम्बन्धो निष्पद्यते । तेन ण्वुलादयः प्रत्ययाः कर्त्रर्थे विधीयन्त इति अर्थोपस्थापनेन कर्तरीत्यर्थनिर्देशः सार्थको भवति । अस्यामवस्थायां लस्थानिकानां शानजादीनां विषयेऽयं पुनर्न प्रवर्तते, तत्र अर्थाकाङ्क्षाया निवृत्तत्वात् । स्थान्यर्थाभिधानसमर्थस्य एव आदेशत्वमिति न्यायेन लकारार्थाभिधायकत्वसिद्धेः शानजादीनां कर्तृकर्मभावार्थकत्वं सिध्यतीति तत्रार्थाकाङ्क्षा निवृत्ता भवतीत्याशयः । अतः शानजादीनां विषये "कर्तरि कृदि"ति [अष्टाध्यायी ०३.०४.६७] सूत्रस्य प्रवृत्तिर्न सम्भवति ।

**मीमांसकमते दोषः**

मीमांसकरीत्या अर्थाकाङ्क्षाभावेऽपि शानजादीनां विषये अर्थनिर्देशकस्य "कर्तरि कृदि"ति [अष्टाध्यायी ०३.०४.६७] सूत्रस्य उपस्थितिः स्वीक्रियते । तथा स्वीकृते शानच्-प्रत्ययस्य कर्तृवाचकत्वमेव सिध्येत्, भावे कर्मणि चार्थे तस्य दौर्लभ्यमापद्येत इति दोषः । शय्यमान आस्यमाने चायं गत इत्यादौ भावार्थे, क्रियमाण इत्यादौ च कर्मण्यर्थे शानज्विधीयते । इत्थं शानचो विषयेऽपि अर्थनिर्देशकस्य प्रकृतसूत्रस्य प्रवृत्तौ भावकर्मणोरर्थयोः शानज्-विधायकस्य सूत्रस्याभावाद् एतादृशाः प्रयोगा नोपपद्येरन्निति दोषः ।

**अत्र समाधानम्**

शानचो विषये "कर्तरि कृदि"ति [अष्टाध्यायी ०३.०४.६७] सूत्रं प्रवर्तते, ततश्चास्य कर्तृवाचकत्वं सिद्धम् । शय्यमान, क्रियमाण इत्यादिप्रयोगेषु च भावकर्मणोः अर्थयोः शानचो लक्षणा स्वीक्रियते । ततश्च प्रयोगानुपपत्तिरूपो दोषो नापद्यत इति मीमांसकैः व्याख्यायते । परन्तु अनया रीत्या अनुशिष्टमर्थं विहायापि स्वेच्छया लक्षणाद्वारा अर्थान्तरोपस्थापने शानचः असाधुत्वमापद्येत । गङ्गादिपदस्य तीराद्यर्थे या लक्षणा आश्रीयते तत्र हि गङ्गापदेन तीरार्थप्रतीतौ उपायान्तरं न परिलक्ष्यते । अतस्तत्र तीरादौ अनुशासनातिरिक्तार्थे गङ्गादिपदानां लक्षणा युज्यते । अत्र तु भावकर्मणोः अर्थयोः प्रतीतये नियामकं विद्यते । अतस्तदतिक्रम्य लक्षणायाः प्रवृत्तौ सत्यां,

लक्षणया उपस्थापितयोः भावकर्मणोरर्थयोः शानचः असाधुतापत्तिः स्यात् । किञ्च, शिष्टप्रयुक्तत्वादपि लक्ष्यभूते तीराद्यर्थे गङ्गादिपदानां साधुत्वम्, अत्र तु स्वेच्छयैव शानचो लक्षणाश्रीयत इत्यसाधुतापत्तेः मीमांसकमते दोषः तदवस्थ एव ।

**शबरस्वामिमतम्**

शाब्दिकरीत्या शत्रादिप्रत्ययविधौ लः कर्मणीत्यादिसूत्रस्य एकवाक्यतया अन्वयो भवति । एवञ्च कर्त्राद्यर्थे विधीयमानानां लकाराणां स्थले आदिष्टत्वात् शत्रादीनामपि कर्त्राद्यर्थकत्वं सिध्यतीति प्रतिपादितम् । अत्र लः कर्मणीत्यादिसूत्रं कर्त्रादौ धर्मिणि शक्तिं बोधयति न तु धर्म इति शाब्दिकानां मतम् । अस्मिन् प्रसङ्गे शबरस्वामिना एकत्वाद्यर्थानामेव लकारार्थत्वं प्रतिपाद्यते । तत्र कर्त्रादयोऽर्था उपलक्षणीभूता इति तन्मते विशेषः ।[१] तथाहि, अर्थनियामकत्वात् लः कर्मणीत्यादिसूत्रस्य प्रत्ययविधिस्थले एकवाक्यतया अन्वयः साधितः । तुल्यरीत्या साकाङ्क्षत्वाद् अस्य "द्व्येकयोर्द्विवचनैकवचने" [अष्टाध्यायी ०१.०४.२२] इत्यादिभिः अर्थनिर्देशपरसूत्रैः अपि अन्वयो भवति । तदा कर्मणीत्यादेः द्वित्वैकत्वादौ विशेषणत्वेन अन्वयो भवति । तेन कर्त्रादिगतैकत्वादौ लकारैकवचनादिः स्यादिति महावाक्यार्थो लभ्यते । विद्यमानत्वे सति व्यावर्तकत्वं विशेषणस्य लक्षणम्, अविद्यमानत्वे सति व्यावर्तकत्वम् उपलक्षणस्य लक्षणम् । शाब्दबोधे उपलक्षणस्य भानं न भवतीति विशेषः । एवञ्च लकारेण शाब्दबोधे एकत्वरूपार्थस्यैव भानं सम्भवति, कर्तृत्वादेः भानं तत्र न जायत इति शबरस्वामिनाम् आशयो बोध्यः ।[२]

लघुमञ्जूषाग्रन्थे द्वित्वैकत्वादौ कर्मणीत्यादेः विशेषणत्वमिति प्रतिपादितम् । तत्र विशेषणत्वस्य उपलक्षणत्वमिति तात्पर्यम् । कर्तुः सङ्ख्यायाम् उपलक्षणत्वं न तु विशेषणत्वमिति भावः । एवञ्च कर्तृगतसङ्ख्याया एवात्र अभिधानं भवति न पुनः कर्त्रादीनाम् अपीति आशयो लब्धः । द्व्येकयोरित्यत्र यद्यपि भावप्रत्ययस्याभाव एव दृश्यते, तथापि सूत्रे द्व्येकयोरित्यस्य भावप्रधाननिर्देशपरतया द्वित्वैकत्वयोरित्येव तात्पर्यं लभ्यते । एवञ्च अनया रीत्या कर्त्रादिगतैकत्वादौ लकारैकवचनादिः सिध्यति । तत्र

[१] शाबरभाष्यम्, जैमिनीयसूत्रम् ०३.०४.१३

[२] नागेशभावप्रकाशः, पृ. ४२

कर्त्रादेः उपलक्षणत्वात् साक्षात् प्रत्ययार्थत्वं न सम्भवति । ततश्च आख्यातस्य धर्म एव शक्तिर्न धर्मिणीति आशयः सिध्यति ।

**शाब्दिकमतम्**

शबरस्वामिभिः लविधिना द्व्येकयोरित्यादेः अन्वयं संसाध्य कर्त्रादिगतैकत्वादिः एव लकारार्थ इति सिद्धान्तो निरूपितः । परन्तु शाब्दिकैः लकारविधौ द्व्येकयोरित्यादेः सम्बन्धो नेष्यते । तथाहि, द्व्येकयोरित्यादिसूत्रस्य नियमत्वं विधायकत्वमिति उभयथापि व्याख्यानं सम्भवति । परन्तु उभयस्मिन्नपि पक्षेऽस्य सूत्रस्य तिबादिसूत्रेणैव एकवाक्यता सम्भवति न तु लः कर्मणीत्यादिना सूत्रेण । तत्र "तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः" [अष्टाध्यायी ०१.०४.१०१] इति सूत्रेण तिङ उभयोः पदयोः प्रथमादिसञ्ज्ञा भवन्ति । ततः प्रथमादिसञ्ज्ञा उद्दिश्य "तान्येकवचन-द्विवचन-बहुवचनान्येकशः" [अष्टाध्यायी ०१.०४.१०२] इत्यनेन प्रथमादीनां त्रयाणां त्रयाणामेकश एकवचनादिसञ्ज्ञा विधीयन्ते । ततः तिबादीनामेव एकवचनादिसञ्ज्ञाः सम्भवन्ति न लकाराणामिति आशयो लभ्यते । अर्थात् द्व्येकयोरित्यादेः येन तिबादिविधिना सहैकवाक्यता, तत्र कर्मणीत्यादेरभावः । यत्र च कर्मणीत्यादेः उपस्थितिः लः कर्मणीत्यादौ, तत्र विधेयभूताया द्विवचनादिसञ्ज्ञाया अभावः । एवञ्च लक्ष्यसंस्कारक-महावाक्यार्थजनकैः तिबादिवाक्यैः एकवाक्यतापन्ने द्व्येकयोरित्यादौ कर्मणीत्यस्याभावात् कर्मण एकत्व एकवचनमिति पूर्वोक्तोऽर्थो न सिध्यति ।

किञ्च, अवान्तरवाक्यार्थबोधजनकेन लकारविधिवाक्येन द्व्येकयोरित्यादिसूत्रस्य एकवाक्यतापन्नत्वेऽपि तयोः परस्परम् उपकार्योपकारकत्वं न सम्भवति । गुणानां परार्थत्वात्तेषु परस्परं सम्बन्धो न स्वीक्रियते । अतः प्रकृते लकारविधिना द्व्येकयोरित्यादिसूत्रस्य परस्परं सम्बन्धो न जायते । तेन महावाक्यार्थं प्रति गुणभूतयोः तयोः अवान्तरवाक्ययोः परस्परम् उपकार्योपकारकत्वं न सम्भवतीति आशयो लभ्यते । इत्थमत्र लकाराणां द्विवचनादिसञ्ज्ञाभावात् कर्मण एकत्वे लकारैकवचनमित्यर्थो लब्धुं न शक्यते । अतो लकारविधिना द्व्येकयोरित्यादिसूत्रस्य सम्बन्धाभावात् शबरस्वामिभिः प्रस्तुतं व्याख्यानम् अयुक्तमिति सारो लब्धः ।

**प्रत्ययव्यवस्थानापत्तिः**

ननु "लटः शतृशानचावप्रथमासमानाधिकरण" [अष्टाध्यायी ०३.०२.१२४] इति शानज्विधेः "भावकर्मणो"रिति [अष्टाध्यायी ०१.०३.१३] आत्मनेपदविधायकेन सूत्रेण एकवाक्यता क्रियते। भावकर्मणोः शानञ्रूपमात्मनेपदं भवतीति समुदितार्थश्च व्याख्यायते। तथा कर्तृवद् भावकर्मणोरपि अर्थयोः शानज्विधिसम्भवान्न कश्चिद्दोष इति मीमांसकैः व्याख्यायते।[३] परन्तु भावकर्मणोरिति आत्मनेपदविधायके सूत्रे धातोरित्यस्य सम्बन्धाद् धातुमात्राद् भावे कर्मणि चार्थे शानच्-प्रत्ययः प्रसज्येत। तदा अकर्मकधातुभ्यो यथा भावे शानच्-प्राप्तिस्तथा सकर्मकेभ्योऽपि, एवं यथा सकर्मकधातुभ्यः कर्मणि शानच्-प्राप्तिः तथा अकर्मकेभ्योऽपीति दोष आपद्यते।

पूर्वोक्तो दोषो मीमांसकमत एव। वैयाकरणरीत्या तु लः कर्मणीत्यादिसूत्रे अकर्मकेभ्यो धातुभ्यो भावकर्त्रोर्लकाराः, सकर्मकेभ्यश्च कर्तृकर्मणोर्लकारा इति वाक्यभेदेन लकारो व्यवस्थीयते। धातुभ्यो विहितस्य तस्यैव लकारस्य स्थाने प्रकृतसूत्रेण आत्मनेपदं विधीयते। एवञ्च शाब्दिकानां नये कदापि सकर्मकधातुभ्यो भावार्थे, अकर्मकेभ्यश्च कर्मार्थे शानचः प्रसङ्गो न सम्भवतीति बोध्यम्। अनया रीत्या अकर्मकेभ्यः कर्मणि, सकर्मकेभ्यश्च भावे शानच्-प्राप्तिरिति प्रत्ययव्यवस्थानापत्तिरूपो दोषो मीमांसकमत एव भवतीति ध्येयम्।

**अर्थव्यवस्थानापत्तिः**

सकर्मकधातूनां कर्मणा सम्बद्धत्वात्तेषां विषये भावे न शानजापत्तिः। किञ्च अकर्मकधातूनां विषये कर्मणा सम्बन्धाभावान्न तत्र कर्मार्थकस्य शानचः प्रसङ्ग इति न कापि दोषापत्तिरिति मीमांसकैः विचार्यते। परन्तु अनया रीत्या भावकर्मार्थयोः निर्वाहसम्भवेऽपि कर्त्रर्थे शानचो विधानं न स्यादिति दोषान्तरम् आपद्यते। तथाहि, "भावकर्मणो"रित्यनेन [अष्टाध्यायी ०३.०३.१३] सूत्रेण शानज्विधायकस्य सूत्रस्य एकवाक्यत्वे स्वीकृते भावकर्मणोः शानज्विधिः सम्भवति। परन्तु तस्याम् अवस्थायामर्थांशे शानचो निराकाङ्क्षत्वात्तस्य पुनः "कर्तरि कृदि"ति [अष्टाध्यायी ०३.०४.६७]

[३] नागेशभावप्रकाशः, पृ.४३

सूत्रेणान्वयो न सम्भवति । तदा कर्त्रर्थे शानचो विधानं न सम्भवेदिति दोषः । अतो मीमांसकरीत्या शानचः कर्तृवाचकत्वानुपपत्तिरूपो दोषः प्रसज्यते ।

अत्रार्थाकाङ्क्षाया निवृत्तावपि कर्तरीत्यस्य शानज्विषये प्रवृत्तिस्वीकारे यद्यपि शानचः कर्तृवाचकत्वं सिध्यति किन्तु तदा प्रत्ययानामर्थनिर्णये अव्यवस्था आपद्यते । यथा "भावे" [अष्टाध्यायी ०३.०३.१८] इत्यनेन भावरूपार्थे घञ्-प्रत्ययो विधीयते । अत्र अर्थाकाङ्क्षाया निवृत्तावपि तद्विषये कर्तरीत्यस्य प्रवृत्तौ घञः कर्तृवाचकत्वमपि सम्भवति । तदवस्थायां घञः कर्तृवाचकत्वम् अथवा भावार्थकत्वमिति विषये अव्यवस्थापद्यते । अतः अर्थाकाङ्क्षाया निवृत्तौ सत्यां, विधौ पुनः अर्थान्तरस्य सम्बन्धो न भवतीति स्वीकर्तव्यम् । तथा स्वीकारे च मीमांसकमते शानचः कर्तृवाचकत्वं न सम्भवेदिति अर्थव्यवस्थानुपपत्तिरूपो दोष आपन्नः ।

**विमर्शः**

यत्र कृत्-प्रत्यया लस्थानिका न भवन्ति, तत्र ण्वुलादिषु कर्तरीत्यादीनाम् अर्थनिर्देशकानां सूत्राणां चारितार्थ्यं लभ्यते । शतृशानजादीनां लस्थानिकानां कृतां प्रसङ्गे तु स्थानिवद्भावेनैव अर्थविज्ञानं सम्भवति । अतस्तत्र स्थानिवद्भावेनैव अर्थज्ञानसम्भवे शत्रादीनां प्रसङ्गे कर्तरीत्यादीनां सूत्राणाम् अन्वयः गौरवदोषयुक्तो भवति । अतो मीमांसामते गौरवदोषोऽपि परिलक्ष्यते । एवञ्च शाब्दिकोक्तरीत्यनुसारं लस्थानिकत्वेनैव शतृशानजादीनां कर्त्राद्यर्थकत्वं प्रतिपादनीयमिति बोध्यम् ।

किञ्च, भावे कर्मणि च धातोर्विहितो यो लकारस्तस्य स्थान आत्मनेपदं स्यादिति "भावकर्मणो"रिति [अष्टाध्यायी ०१.०३.१३] सूत्रस्यार्थः प्रसिद्धः । परन्तु मीमांसकरीत्या शानज्विधेः प्रकृतसूत्रेण एकवाक्यत्वव्याख्याने त्रयो दोषाः सम्भवन्ति । ते च—

(१) प्रथमतः, पूर्वोक्तरीत्या एकवाक्यत्वे स्वीकृते लकारस्य निरर्थकत्वमापद्यते । तदित्थम्, मीमांसकरीत्या शानज्विधेः आत्मनेपदविधेश्च यद् एकवाक्यत्वं व्याख्यायते तस्य वाक्यैकवाक्यत्वात् लकारस्य पुनः शानज्विधावन्वयो न सम्भवति । अस्यां स्थितौ लकारस्य निरर्थकत्वमापद्येत । शाब्दिकैस्तु लः कर्मणीत्यादौ आत्मनेपदविधेः साक्षादन्वयः क्रियते । अतस्तद्रीत्या लकारस्य कर्त्राद्यर्थवाचकत्वं लभ्यत इत्यदोषः ।

(२) द्वितीयतः, कर्तर्यर्थ आत्मनेपदं न सिध्येत् । अत्र लकारविधिम् अनादृत्यैव शानज्विधेः भावकर्मणोरित्यनेन एकवाक्यत्वे प्रतिपादिते भावकर्मणोरेव आत्मनेपदं स्यादिति नियमः सम्भवेत् । न चेष्टापत्तिः, तस्मिन्नियम एवकारेण कर्तृरूपार्थस्य व्यवच्छेदाद् आत्मनेपदस्य कर्तृवाचकत्वं न सिध्येत् ।

(३) तृतीयतो, लः कर्मणीत्यादिसूत्रकृताया अर्थव्यवस्थाया वैयर्थ्यापत्तिः । पूर्वोक्तरीत्या निर्वाहेऽस्मात् सूत्रादेव भावकर्मणोरर्थयोः तङादेर्विधानं स्यात्, शेषात्कर्तरीत्यादिसूत्राच्च तिबादेः कर्तरि विधानं स्यात् । ततो लः कर्मणीत्यादिसूत्रस्य अर्थव्यवस्थापकत्वं न सम्भवेदिति दोषः । अत्र कथञ्चिन्निर्वाहेऽपि सकर्मकेभ्यो भावार्थे शानचो निराकरणं न सम्भवतीति दोषान्तरम् अन्वेषणीयम् ।

एवं दोषापत्तेः मीमांसकोक्तम् एकवाक्यत्वं न स्वीकरणीयम्, लः कर्मणीत्यादिसूत्रस्यैव च अर्थव्यवस्थापकत्वं मन्तव्यमिति ज्ञायते । कथञ्चित्तदुक्तस्य एकवाक्यत्वस्य स्वीकारेऽपि तस्य जञ्जभ्यमानाधिकरणेन विरोध आपद्यते । तत्र हि जञ्जभ्यमानेति प्रयोगो दृश्यते । जभी-धातोः यङन्तात् कर्तरि लटि लटः शानजादेशेऽयं प्रयोगः सिध्यति । एवमत्र कर्त्रर्थे शानचं विधाय शानजर्थमनूद्य मन्त्रोच्चारणरूपः कर्तृकर्मसंस्कारो विधीयते । पूर्वोक्तरीत्या एकवाक्यत्वेन निर्वाहे क्रियमाणे तु शानचः कर्त्रर्थकत्वं न स्यात् । परन्तु जञ्जभ्यमानाधिकरणे शानचा कर्तृरूपार्थस्य प्रतीतिः निरूपितेति विरोधः स्पष्टः ।

**उपसंहारः**

शाब्दिकानां मते आख्यातानां कृतां चेति उभयेषामपि कर्त्राद्यर्थकत्वं स्वीक्रियते । अत एतेषां मते शानजादिषु पृथग् व्याख्यानं नापेक्ष्यते । किन्तु मीमांसकैः आख्यातानां भावनार्थकत्वं कृतां च कर्त्राद्यर्थकत्वमिति भिन्ना अर्थव्यवस्था प्रकल्प्यते । अतस्तेषां मते शानजादिषु पृथग् व्याख्यानम् अपेक्ष्यते । परन्तु आख्यातानां कर्त्राद्यर्थकत्वं विना शानजादीनां कर्त्राद्यर्थकत्वनिरूपणं कथमपि न सम्भवति । कथञ्चित् सम्भवति चेदपि तद् गौरवदुष्टं भवति, जञ्जभ्यमानाधिकरणे च विरोध आपद्यते । अतः शाब्दिकोक्तरीत्या आख्यातानां कृताम् इति उभयेषामपि कर्त्राद्यर्थकत्वं निरूपणीयम् । एतेन शानचोऽपि कर्त्राद्यर्थकत्वे सिद्धे न कापि दोषापत्तिः ।

अत्रैतस्य विषयस्य युक्तत्वायुक्तत्वे विद्वांस एव प्रमाणमिति विनिवेद्य अत्रैव विरम्यत इति शम् ।

✶ ✶ ✶

## Bibliography


1. *मीमांसादर्शनम्* (शाबरभाष्य-श्लोकवार्तिक-तन्त्रवार्तिक-टुप्टीका-प्रभाटीकासहितम्) ; महर्षिजैमिनिः ; शबरस्वामी, कुमारिलभट्टः, श्रीवैद्यनाथशास्त्री ; न्यु भारतीय बुक कर्पोरेशन ; नवदेहली ; २०२१ ई. ; द्वितीयो भागः ; ISBN – 9788183153577 ।
2. *वैयाकरणसिद्धान्तभूषणम्* (निरञ्जनीव्याख्यया प्रकाशटिप्पण्या च सहितम्, द्वितीयो भागः) ; कौण्डभट्टः ; रामयत्नशुक्लः, के. वि. रामकृष्णमाचार्यः ; सम्पा. के.वि. रामकृष्णमाचार्यः ; Institut Français de Pondichéry, श्रीसोमनाथ-संस्कृत-विश्वविद्यालयः, École Française D'extrême-Orient; गुजरात ; २०१५ ई. ; प्रथमप्रकाशनम् ; प्रथमो भागः ; ISBN – 9788184702088 ।
3. *वैयाकरणभूषणसारः* (प्रभा-दर्पण-व्याख्याद्वयोपेतः) ; कौण्डभट्टः ; श्रीबालकृष्णपञ्चोली, श्रीहरिवल्लभशास्त्री ; चौखम्भा संस्कृत संस्थान ; वाराणसी ; पुनर्मुद्रितसंस्करणम् ; २०२१ ई. ; ISBN – 8186937986 ।
4. *वैयाकरणसिद्धान्तलघुमञ्जूषा* (कुञ्चिका-कला-व्याख्योपेता सरला-हिन्दीव्याख्यासमेता च) ; नागेशभट्टः ; श्रीदुर्बलाचार्यः, श्रीबालम्भट्टः, श्रीरामप्रसादत्रिपाठी ; सम्पा. रामप्रसादत्रिपाठी ; सम्पूर्णानन्दसंस्कृविश्वविद्यालयः ; वाराणसी ; १९९० ई. ; प्रथमो भागः ।
5. *नागेशभावप्रकाशः* (नागेशभावप्रकाशसहितः लघुमञ्जूषायां तिङर्थनिर्णयः) ; पेरिसूर्यनारायणशास्त्री ; (Published with the financial assistance of Tirumala Tirupati Devastanams under their scheme aid to public religious books) चित्तूरु ; १९९० ई. ।


✳ ✳ ✳